नोऽङित्स्विति गुणः ततः पचाद्यच् नञ्समासः।) भृङ्गराजवृक्षः। इति शब्दरत्नावली॥ जागरणरहिते त्रि॥

अजाजी, स्त्री, (अजेन वीयते अत्युत्कटगन्धतया त्यज्यतेऽसौ अज्+इञ् अजादिभ्यश्च इति कर्म्मणि इञ्। अजेन आजिः तृतीया तत्। स्त्रियां वा ङीप्) श्वेतजीरकः। कृष्णजीरकः। काकोदुम्बरिका। इति राजनिर्घण्टः॥

अजाजीवः, पुं, (अजेन अजव्यवसायेन आजीवति सम्यक् प्राणान् धारयति यः, आ+जीव+पचाद्यच् अजेन आजीवः तृतीयातत्पुरुषः) जावालः। छागोपजीवी। इत्यमरः॥

अजातः, त्रि, (जन्+कर्त्तरि क्तः न जातः नञ्समासः।) अजन्मविशिष्टः। अनुत्पन्नः। यथा। अजातपक्षा इव मातरं खगाः। इति श्रीभागवतं॥ (यथा दायभागे,—
"ये जाता येऽप्यजाता वा ये च गर्भे व्यवस्थिताः।
वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिलोपो विगर्हितः"॥)

अजातशत्रुः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति हेमचन्द्रः॥ (यथा महाभारते,—
"अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत्"।)
(शिवः। काशीपुत्त्रः। शमीकपुत्त्रः।)(यथा हरिवंशे,
"श्यामपुत्त्रः शमीकस्तु शमीको राज्यमावहत्।
जुगुप्समानो भोजत्वाद्राजसूयमवाप सः।
अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः"॥)
(विम्बिसारपुत्त्रः स च शाक्यमुनिसमकालीनः॥)

अजातारिः, पुं, (अजातः सर्व्वप्रियत्वात् अनुत्पन्नः अरिः शत्रुर्यस्य सः) राजा युधिष्ठिरः। इति भूरिप्रयोगः॥

अजातौल्वलिः, पुं, (अजया उपजीवी तौल्वलिः मुनिविशेषः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च। तुल्वलस्यापत्यं तुल्वल+अत इञिति इञ्) अजोपजीविमुनिविशेषः। इति मध्यपदलोपिकर्म्मधारयसमासे सुपद्मव्याकरणं॥ तुल्वलस्यापत्यं तौल्वलिः अजोपजीवी चासौ तौल्वलिश्चेति। इति तट्टीका॥

अजादनी, स्त्री, (अजेन तृप्यर्थमद्यते भक्ष्यतेऽसौ अद्+कर्म्मणि ल्युट् स्त्रियां ङीप् अजस्य अदनी खाद्या षष्ठीतत्पुरुषः) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

अजानेयः, पुं, (अजवत् शिववृषवत् यथास्थानमारोहिणं नयति प्रापयति। आ+नी+कृत्यल्युटो बहुलमिति सूत्रेण कर्त्तरि यत्। अजश्छागे हरिब्रह्मधातुस्मरहरे वृषे इति मेदिनी) उत्तमघोटकः। तत्पर्य्यायः। हयोत्तमः २ वाताश्वजात्यः ३। इति त्रिकाण्डशेषः॥ अजानेयः ४ कुलीनः ५। इत्यमरः॥ निर्भये त्रि। इति त्रिकाण्डशेषः॥

अजान्त्री, स्त्री, (अजस्य अन्त्रमिव देहबन्धनमिव अन्त्रं तदाकारमञ्जरी यस्याः सा षिद्गौरादिभ्यश्च इति ङीष्) वृक्षविशेषः। नीलवर्णवोना इति भाषा तत्पर्य्यायः। नीलवृन्ता २ नीलपुष्पी ३ अतिलोमशा ४ नीलिनी ५ छगलान्त्री ६ अन्तःकोटरपुष्पी ७। इति रत्नमाला॥ वस्तान्त्री। वृद्धदारकः। इति राजनिर्घण्टः॥

अजापालकः, त्रि, (अजानां पालकः रक्षकः षष्ठीतत्पुरुषः) अजाजीवी। छागरक्षकः। इति शब्दरत्नावली॥

अजितं, त्रि, (न जितं न पराजितं नञ्समासः। जि+कर्म्मणि क्तः) अनिर्जितं। इति हेमचन्द्रः॥ अतिपराजितश्च॥

अजितः, पुं, (न जितः न केनापि पराजित ऐश्वर्य्येण। "वेधाः शार्ङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युत" इति सहस्रनाम पर्य्याये।) विष्णुः। बुद्धः। तीर्थकृज्जैनविशेषः। इति हेमचन्द्रः॥ शिवः। इति तस्य सहस्रनाममध्ये पठितः॥

अजिनं, क्ली, (अजति धूल्यादि आवृणोति यत् अज्+कर्त्तरि इनन् बाहुल्यात् अजेर्व्यघञ् पोश्च इति नवी आदेशः) (अजाजिनं शोणितविन्दुवर्षि चेति कुमारसम्भवे) चर्म्म। ब्रह्मचार्य्यादिधार्य्यकृष्णसारादित्वक्। इत्यमरः॥ जिनभिन्ने वाच्यलिङ्गं।

अजिनपत्रा, स्त्री, (अजिनं चर्म्म पत्रं पक्षो यस्याः सा) चर्म्मचटिका। चामचिका इति ख्याता। तत्पर्य्यायः। जतुका २। इत्यमरः॥ जतूका ३। इति तट्टीका।

अजीनपत्री, स्त्री, (अजीनं चर्म्म पत्रं यस्याः सा गौरादित्वात् ङीष्) जतुका। इति राजनिर्घण्टः॥

अजिनयोनिः, पुं, (अजिनानां चर्म्मणां योनिः आकरः षष्ठीतत्पुरुषः। योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे इति मेदिनी) हरिणः। इत्यमरः॥

अजिरं, क्ली, (अजति गृहाग्निःसरति यत्र अज+अधिकरणे किरच्। उठान इति भाषा। अजति गच्छति यः इति वायुः। अजति गच्छति क्षणभङ्गुरमिति यावत् इति शरीर। अजन्ति इन्द्रियाणि गच्छन्त्यत्र इति व्युत्पत्त्या विषयः।) चत्वरं। (यथा विष्णुपुराणे,—
"पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे"।)
वायुः। शरीरं। मण्डूकः। विषयः। इति मेदिनी॥

अजिह्मं, त्रि, (जिहि वक्रतायां जिहि+मक् न जिह्मं नञ्समासः) अवक्रं। सरलं॥ इत्यमरः॥ भेके पुं। इति शब्दरत्नावली॥ (यथा मनुः,—
"अजिह्मामशठां शुद्धां जीवेत् ब्राह्मणजीविकां"।)

अजिह्मगः, पुं, (अजिह्मं सरलं गच्छति यः अजिह्म+गम्+डः उपपदसमासः) बाणः। इत्यमरः॥ अवक्रगे वाच्यलिङ्गः॥ (यथा रामायणे,—
"ते तस्य कायं निर्भिद्य रक्तपुङ्खा अजिह्मगाः।
निष्पेतुर्लोहितादिग्धा रक्ता इव महोरगाः॥
न ह्यविद्धं तयोर्गात्रे बभूवांगुलमन्तरं।
नानिर्भिन्नं न चाध्वस्तमपि सूक्ष्ममजिह्मगैः"॥)

अजिह्वः, पुं, (नास्ति जिह्वा यस्य सः) भेकः। इति त्रिकाण्डशेषः॥ जिह्वारहिते त्रि॥

अजीर्णं, क्ली,(जॄ+क्तः, न जीर्णं नञ्समासः) अपाकः। तत्पर्य्यायः। वायुगण्डः २ अन्तर्वमिः ३ पलताशयः ४। इति त्रिकाण्डशेषः॥ अथाजीर्णस्य विप्रकृष्टं निदानमाह। अत्यम्बुपानाद्विषमाशनाच्च सन्धारणात् स्वप्नविपर्य्ययाच्च। कालेऽपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य॥ सन्धारणात् क्षुदातमूत्रपुरीषादीनां। स्वप्नविपर्य्ययात् दिवाशयनाद्रात्रौ जागरणात्। लघु चापीत्यपिशब्दात् स्निग्धोष्णादिगुणयुक्तमपि॥*॥ अन्यच्च।
"ईर्षाभयक्रोधपरिप्लुतेन
लुब्धेन रुग्दैन्यनिपीड़ितेन।
प्रद्वेषयुक्तेन च सेव्यमान-
मन्नं न सम्यक् परिपाकमेति"॥
परिप्लुतेन व्याप्तेन। उक्तकारणेभ्योऽतिमात्रभोजनं विशेषादजीर्णस्य कारणमजीर्णञ्च बहुव्याधीनां कारणमित्याह।
"अनात्मवन्तः पशुवद्भुञ्जते येऽप्रमाणतः।
रोगानीकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि"॥
अनात्मवन्तः अबुद्धिमन्तः। रोगानीकस्य विसूच्यादेः। मूलं कारणं॥*॥ अन्यच्च।
"प्रायेणाहारवैषम्यादजीर्णं जायते नृणां।
तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति"॥
तद्विनाशाद्विनश्यति अजीर्णविनाशात् विनश्यति रोगसंघात इत्यर्थः। यद्वा तत् अजीर्णं आशात् भक्षणात् विना भक्षणाभावे विनश्यति निवर्त्तते इत्यर्थः॥*॥ अजीर्णस्य सामान्यस्य लक्षणमाह।
"ग्लानिर्गौरवमाटोपो भ्रमो मारुतमूढ़ता।
विबन्धोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्षणं"॥
मारुतमूढ़ता वायोरवरोधः। विबन्धः मलाप्रवृत्तिः॥*॥ सन्निकृष्टकारणैः सहितानजीर्णस्य भेदानाह।
"आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रिभिः"।
त्रिभिरित्येकशो न तु मिलितैः।
"अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषतः"॥
केचित् सुश्रुतादयः। रसशेषतः भुक्तस्य पक्वस्य सारभूतो यो द्रवः स रसः सोऽपि पच्यते। भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्वः स रसशेषः तस्मात् चतुर्थमजीर्णं नत्वामाजीर्णं॥*॥ नन्वामाजीर्णाद्रसशेषस्य को भेद उच्यते। आमं मधुरतागतमपक्वं अन्नमेव। रसशेषस्तु भुक्तस्य पक्वस्य सारभूतो यो द्रवः स चापक्व इति भेदः।
अजीर्णं पञ्चमं केचित् निर्द्दोषं दिनपाकि च। निर्द्दोषं गौरवभ्रमशूलादिदोषाजनकं। दिनपाकि च आहारोऽहोरात्रेण पाकं यातीति स्वभावः। यत्तु मात्राकालसात्म्यादिदोषाद्दिनान्तरे पाकं याति तद्दिनपाकि। अतएव याममध्ये न भोक्तव्यमिति वचनं,—
वदन्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरं"।
प्राकृतं अविकारकं। प्रतिवासरं प्रतिदिनभावि। भुक्तं यावन्नजीर्णं तावदजीर्णमित्युच्यते। एतदभिधानस्य प्रयोजनं पाकार्थं वामपार्श्वशयन-